दिनाङ्क : 31/08/2025 सायम् - 06:20

**मुख्यवार्ताः**

- **प्रधानमन्त्री नरेन्द्रमोदी चीनदेशस्य राष्ट्रपतिः षी चिनफिङ्ग् च अद्य पुनः दृढीकृतवन्तौ यत् उभौ देशौ विकासे सहभागिनौ स्तः, न तु प्रतिद्वन्द्वी, तयोः भिन्नाभिप्रायाः विवादरूपेण न परिवर्तयेत् इति।**

- **आकाशवाण्याः स्वकीये मन की बात कार्यक्रमे प्रधानमंत्री नरेंद्र मोदी प्रत्येकं नागरिकं प्रति आभारं प्रकटितवान् ये अस्मिन् काठिन्य प्रावृट् समये मानवतां सर्वोपरि परिलक्षिता।**

- **ऋतुविभागेन अद्य देशस्य उत्तरभागे अतिवृष्टेः सम्भावना प्रकटिता राजधान्यां नव दिल्ल्यां अद्य प्रातः यमुना नद्याः जलस्तरे वृद्धिः अभवत्।**

- **बिहारस्य राजगीर्-नगरे एशियाकप-पुरुष-हॉकी-प्रतियोगितायां भारतेन अद्य सायं जापान-दलं त्रीणि-द्वे इति अङ्कान्तरालेन पराजितम्।**

## पि. एम्.-एस्. सि. ओ. (PM-SCO)

प्रधानमन्त्री नरेन्द्रमोदी चीनदेशस्य राष्ट्रपतिः षी चिनफिङ्ग् च अद्य पुनः दृढीकृतवन्तौ यत् उभौ देशौ विकासे सहभागिनौ स्तः, न तु प्रतिद्वन्द्वी, तयोः भिन्नाभिप्रायाः विवादरूपेण न परिवर्तयेत् इति। थियांजिन्-नगरे शाङ्घाई-सहकार-सङ्घटन- शिखरसम्मेलनेतर उभौ नेतारौ मिलितवन्तौ। प्रधानमन्त्री मोदी द्वैपाक्षिकसम्बन्धानां निरन्तरविकासाय सीमाक्षेत्रेषु शान्तेः सौहार्दस्य च महत्त्वं प्रकाशितवान्। उभौ नेतारौ समग्र-द्वैपाक्षिक-सम्बन्धानां राजनैतिक-दृष्टिकोणे, उभयोः देशयोः जनानां दीर्घकालिक-हितानां संदर्भे सीमायां विवादस्य निष्पक्षं, युक्तियुक्तं, परस्पर-स्वीकार्यं च समाधानाय प्रतिबद्धतां प्रकटितवन्तौ। अस्य मासस्य आरम्भे विशिष्ट-प्रतिनिधि वार्तायां स्वीकृतान् महत्त्वपूर्ण-निर्णयान् तौ अङ्गीकृतवन्तौ, तेषां प्रयत्नान् अधिकं समर्थयितुं च सहमतौ अभवताम्। प्रधानमंत्री नरेन्द्रमोदी शिखरसम्मेलनावधौ म्यामां देशस्य राज्य सुरक्षा एवं शांति आयोगस्य अध्यक्षेण जनरल **मिन आंग हलिंग** इत्यनेन सह मेलनम् अकरोत्।

## मन की बात

प्रधानमंत्री नरेंद्र मोदी प्रोक्तवान् यत् देशं **वोकल फॉर लोकल** इति मंत्रेण सह आत्मनिर्भर भारतम् विकसित भारतम् इत्युभे लक्ष्ये प्रति अग्रेसरति। अद्य आकाशवाण्याः मन की बात इति कार्यक्रमे स्व विचारान् प्रकटीकुर्वन्, श्री मोदी प्रोक्तवान् यत् पर्वाणां समये देशवासिनः स्वदेशे निर्मितानि वस्तूनि कदापि न विस्मृतव्यानि । प्रधानमंत्री अवदत् यत् , "एकं भारतं -श्रेष्ठं भारतं इत्यस्य भावः, देशस्य एकतायै, राष्ट्रस्य विकासाय च अति महत्वपूर्णः अस्ति। क्रीडाः अस्मिन्नेव महत्त्वपूर्णां भूमिकां निर्वहन्ति। " श्री मोदिना भणितं यत् , "यः क्रीडति सः एव विकसति । असौ श्रीनगरस्य डल-झील इत्यत्र आयोजिते प्रथमे खेलो इंडिया वाटर स्पोर्ट्स फेस्टिवल इत्यस्मिन् विषये चर्चा विहितवान् । येषु आदेशात् अष्ट शत क्रीडकाः भागं अभजन्तः।

कार्यक्रमावधौ , प्रधानमंत्री ओडिशायाः रश्मिता साहू श्रीनगरस्य मोहसिन अली, चोभाभ्याम् सह परिचर्चां विहितवान्। असौ प्रोक्तवान् यत् रॉयल प्रीमियर लीग इत्यस्य प्रथमे दिवसे क्रिकेट क्रीड़ा वधौ जम्मू-कश्मीरस्य पुलवामाजनपदस्थ क्रीड़ांगणे बहुसंख्यायां जनाः एकत्रिताः अभवन् । श्री मोदी प्रोक्तवान् यत् सहस्रतोप्यधिका: जनाः रात्रावधौ क्रिकेट क्रीडया आनंदिताः सञ्जाताः। एतत् दृश्यं अकल्पनीयं अस्ति। प्रधानमंत्री अवदत् यत् अस्मिन् प्रावृट् समये प्राकृतिक आपदाः प्रचलन्ति। असौ प्रोक्तवान् यत् विगतेषु सप्ताहेषु देशे जलप्लावनेन भूस्खलनेन च अनेकाः घटनाः दृग्गोचरीभूताः। एताभिः घटनाभिः देशवासिनः दुःखम् अनुभवन्ति। श्री मोदिना प्रत्येकं नागरिकं प्रति आभारं प्रकटितम् ये अस्मिन् काठिन्य समये मानवतां सर्वोपरि परिलक्षिता।

<u>अमित शाह गुजरात</u>

केन्द्रीयः गृह-सहकारिता-मन्त्री अमित शाहः अद्य अहमदाबाद्-नगरस्य गोटा-क्षेत्रे ओगनाज-नगर-स्वास्थ्य-केन्द्रस्य उद्घाटनम् अकरोत्। एतत् केन्द्रं नागरिकान् उन्नतस्वास्थ्यसेवाः प्रददाति। सः चान्द-लोडिया-नगरे वंदे मातरम्-नगर-स्वास्थ्य-केन्द्रम् अपि उद्घाटितवान्, तथा च रानिप-क्षेत्रे वृक्षारोपण-कार्यक्रमस्यान्तर्गतं वृक्षं रोपितवान्। अवधेयम् अस्ति यत् श्रीशाहः स्वस्य संसदीयक्षेत्रस्य द्वि दिवसीय यात्रायाम् अस्ति।

<u>तेलङ्गाना अस्सेम्ब्ली बिल्स्:</u>

तेलङ्गाना-विधानसभायाम् अद्य पञ्चविंशत्यधिक द्विसहस्रतम वर्षस्य पञ्चायत-राज (संशोधन) विधेयकम्, तथा पञ्चविंशत्यधिक द्विसहस्रतम वर्षस्य तेलङ्गाना-नगरपालिका (संशोधन) विधेयकम् च सर्वसम्मत्या स्वीकृतम्, येन आगामि स्थानीय-निकाय-निर्वाचनेषु वंचितवर्गेभ्यः द्विचत्वारिंशत् प्रतिशतम् आरक्षणस्य कार्यान्वयनं सुकरं भवेत्। द्वाभ्यां विधेयकाभ्यां प्रायः आरक्षणस्य पञ्चाशत् प्रतिशतपरिमितिम् सीमाम् अपासार्य, पञ्चायतम् अतिरिच्य नगरपालिकासु सदस्येभ्यः, अध्यक्षेभ्यः, महापौरेभ्यः च निर्वाचने द्वि चत्वारिंशत् प्रतिशतं आरक्षणं प्रदातुं च प्रस्तावः अस्ति।

<u>लखनऊ-विस्फोट</u>

लखनऊ नगरे सञ्जाते विस्फोटे द्वौ जनौ मृत्युमुपगतौ। पञ्च जनाः व्रणिताश्च। जनपदाधिकारी विशाख जी. संसूचितवान् यत् गुदांबा आरक्षि स्थानकस्य बहता बाजार इति क्षेत्रे अवैध रूपेण संचालिते एकस्मिन् विस्फोटक निर्माण संयंत्रे एषा घटना संजाता। घटनायाः अनंतरं राज्यापत्मोचन बलं, राष्ट्रियापत्मोचनबलं चोभौ सहाय्योद्धाराय उपस्थितौ स्तः। श्रीयोगी आदित्यनाथः अस्यां घटनायां मृतानां जनानां प्रति शोकं प्रकटितवान्। सहैव व्रणितान् जनान् चिकित्सालयं प्रति प्रेषणस्य आदेशं प्रदत्तवान्।

ऋतु विज्ञान विभाग:

ऋतु विज्ञान विभागेन अद्य पश्चवर्ती उत्तर प्रदेश, पंजाब, हरियाणा, चंडीगढ़, पूर्वीय राजस्थान, हिमाचल प्रदेश, उत्तराखंड इत्येतेषु राज्येषु अतिवृष्टेः संभावना प्रकटिता। सममेव अनेन विभागेन असम , मेघालय , छत्तीसगढ़, तटीय आन्ध्र प्रदेश, गुजरात, मध्य प्रदेश, नगालैंड, मणिपुर, मिजोरम, त्रिपुरा चेत्येषु राज्येषु अपि मेघगर्जनेन सह तीव्रवायो: संभावना प्रकटिता। अपरत्र राजधान्यां नव दिल्ल्यां अद्य प्रातः यमुना नद्याः जलस्तरे वृद्धि: अभवत्।

एशिया कप हॉकी राजगीर

बिहारस्य राजगीर्-नगरे एशियाकप-पुरुष-हॉकी-प्रतियोगितायां भारतेन अद्य सायं जापान-दलं त्रीणि-द्वे इति अङ्कान्तरालेन पराजितम्।

।। इति वार्ता:।।